# शिवरहस्यं शान्तद्वायं



## ।। सप्तत्रिंशोऽध्यायः ।।

**ईश्वर उवाच -**

शान्त्यध्यायान् प्रवक्ष्यामि समाहितमनाः शिवे ।
राजचोराग्निपीडासु ग्रहभूतगदादिभिः ।। 1

पीडितानां शिवे शान्त्यै मयैव मनसा कृताः ।
तच्छृणुष्व वदाम्यद्य सर्वपापक्षयाय च ।। 2

अतः परमिदं गुह्यं रुद्रोद्गीतं महोदयम् ।
महाविघ्नप्रशमनं महाशान्तिकरं शुभम् ।। 13

अकालमृत्यशमनं सर्वव्याधि निवारणम् ।
परचक्रप्रमथनं सदा विजयवर्धनम् ।। 4

स्तम्भनं परसैन्यस्य रिपुनाशकरं सदा ।
विषग्रहक्षयकरं समस्ताभीष्टदायकम् ।। 5

सर्वशान्त्यधिकाराख्यं धर्मं वक्ष्ये शृणुष्व तम् ।
स शान्तिधारकस्त्र्यक्षो नागयज्ञोपवीतवान् ।। 6

चतुर्मुखश्चतुर्बाहुः सितभस्मावगुण्ठितः ।
वरो वरेण्यो वरदो वामदेवो महेश्वरः ।। 7

त्रैलोक्यनमितः श्रीमान् शान्तिमाशु करोतु मे ।
सर्वावयवमुख्येन गात्रेण तनुमध्यमा ।। 8

पीतश्यामातिसौम्येन शिवरूपेण शोभिता ।
ललाटतिलकोपेता चन्द्ररेखार्धधारिणी ।। 9



दिव्याम्बरधरादेवी सर्वाभरणभूषिता ।
वरस्त्री सर्वनारीणां शोभागुणमहास्पदा ।। 10

भावनामात्रसन्तुष्टा उमा देवी वरप्रदा ।
साक्षादागत्य रूपेण शान्तानामिव तेजसा ।। 11

शान्तिं करोतु मे प्रीता भक्तानां भक्तवत्सला ।
पद्मरागद्युतिः सौम्यो रक्तमाल्यानुलेपनः ।। 12

अबालो बालरूपेण षण्मुखः शिखिवाहनः ।
पूर्णेन्दुवदनः सौम्यस्त्रिशिखाशक्तिसंयुतः ।। 13

कृत्तिकोमाग्निरुद्राङ्गगङ्गोद्भूतः सुरार्चितः ।
कार्तिकेयो महातेजा वरदानैकतत्परः ।। 14

शान्तिं करोतु मे प्रीतो बलं सौख्यं च सर्वदा ।
महोदरो महाकायः स्निग्धाञ्जनसमप्रभः ।। 15

एकदंष्ट्रोत्कटो देवो गजवक्त्रो महाबलः ।
नागयज्ञोपवीती च नागाभरणभूषितः ।। 16

सर्वार्थसम्पदाधारो गणाध्यक्षो वरप्रदः ।
रुद्रस्य तनयो देवो नायकोऽथ विनायकः ।। 17

करोतु मे महाशान्तिं कर्मसिद्धिं च सर्वदा ।
इन्द्रनीलनिभाक्षोऽग्निपशुशूलायुधोद्यतः ।। 18

रक्ताम्बरधरः श्रीमान् कृष्णाङ्गो नागभूषणः ।
पापापनोदनः शुद्धस्त्वलक्ष्मीमलनाशनः ।। 19

करोतु मे महाशान्तिं महाकालो महाबलः ।
पूतवस्त्रपरीधाना कन्या पुष्पैःस्वलङ्कृता ।। 20

गणनाथाम्बिका त्र्यक्षा पुण्या गौरी सुरेश्वरी ।
सर्वसिद्धिप्रदा देवी प्रसादपरमा परा ।। 21

शान्तिं करोतु मे शान्ता सिद्धिमाशु प्रयच्छतु ।
स्निग्धा श्यामलवर्णेन महिषासुरमर्दिनी ।। 22

धनुश्चक्रप्रहरणा शङ्खयष्ट्यसिधारिणी ।
अतर्जनोद्यतकरा सर्वोपद्रवनाशिनी ।। 23

सर्वमङ्गलमाता मे शिवमाशु प्रयच्छतु ।
निर्मांसेन शरीरेण सुस्नाय्वस्थिनिबन्धनः ।। 24

अतिसूक्ष्मोऽतिविक्रान्तस्त्र्यक्षो भृङ्गिरिटिर्महान् ।
रुद्रात्मजो रुद्रवीरो रुद्रैकगतमानसः ।। 25

सोऽपि शान्तात्मभावेन शान्तिमाशु करोतु मे ।
प्रचण्डगणसैन्येशो महाकालास्त्रधारकः ।। 26

अक्षमालार्पितकरस्त्र्यक्षश्चण्डेश्वरः प्रभुः ।
प्रचण्डपापहरणो बृहस्पत्यादिशोधकः ।। 27

करोतु मे महायोगी कल्याणं परमं शुभम् ।
पद्मासनः पद्मनिभश्चतुर्वदनपङ्कजः ।। 28



कमण्डलुधरः श्रीमान् देवगन्धर्वपूजितः ।
शिवध्यानैकनिरतः शिवसद्भावभावितः ।। 29

ब्रह्मशब्देन दिव्येन ब्रह्माशान्तिं करोतु मे ।
शङ्खकुन्देन्दुवर्णाभिः कण्ठे मरकतप्रभः ।। 30

अक्षमालाशिरा उग्रशिवज्ञानव्यवस्थितः ।
चतुर्मुखश्चतुष्पादस्त्रिणेत्रः सर्वदोज्जवलः ।। 31

क्षितेः पतिर्वृषो देवो धर्मो धर्मोत्तमोत्तमः ।
ईशं वहति पृष्ठेन तस्माद्धर्मो जगत्प्रभुः ।। 32

वृषो वृषपतिश्रीमान् देवगन्धर्वपूजितः ।
शिवज्ञानैकसम्पन्नः शिवसद्भावभावितः ।। 33

वृषशब्देन दिव्येन वृषः शान्तिं करोतु मे ।
ताक्ष्यासनश्चतुर्बाहुः शङ्खचक्रगदाधरः ।। 34

श्यामः पीताम्बरधरो वनमालाविभूषितः ।
यज्ञो देवोत्तमो देवो माधवो मधुसूदनः ।। 35

शिवप्रसादसम्पन्नः शिवध्यानपरायणः ।
शिवार्चनरतो नित्यं विष्णुः शान्तिं करोतु मे ।। 36

पद्मरागप्रभो देवी चतुर्वदन पङ्कजा ।
अक्षमालार्पितकराकमण्डलुधरा शिवा ।। 37

ब्रह्माणी सौम्यवदना शिवपूजापरायणा ।
शान्तिं करोतु मे प्रीता ब्रह्मशब्देन निर्मला ।। 28

मयूरवाहना देवी सिन्दूरारुणविग्रहा ।
शक्तिहस्ता महारूपा सर्वाभरणभूषिता ।। 29

रुद्रभक्ता महापुण्या रुद्रार्चनरता सदा ।
कौमारी वरदा देवी क्षेमारोग्यं ददातु मे ।। 30

शङ्खचक्रगदाहस्ता श्यामा पीताम्बरप्रिया ।
चतुर्भुजा तार्क्ष्यरथा वैष्णवी सुरपूजिता ।। 31

शिवार्चनरता भक्ता रुद्रैकगतमानसा ।
शान्तिंकरोतु मे नित्यं सर्वासुरविमर्दिनी ।। 32

हिमसेतुनिभा देवी महावृषभवाहिनी ।
त्रिशूलहस्ता वरदा नानाभरणभूषिता ।। 33

रुद्रभक्ता महावीर्या रुद्रार्चनरता सदा ।
चतुर्भुजा चतुर्वक्त्रा त्रिणेत्रा पापहारिणी ।। 34

आर्तिं हरतु मे प्रीता माहेशी नित्यमुज्ज्वला ।
वराहघोणविकटा वराहवरवाहना ।। 35

श्यामाङ्गा वरदा देवी शङ्खचक्रगदाधरा ।
तर्जयन्ती सदा विघ्नान् अर्चयन्ती सदाशिवम् ।। 36



वाराही वरदा देवी क्षेमारोग्यं ददातु मे ।
ऐरावतगजारूढा वज्रहस्ता महाबला ।। 37

नेत्राणां च सहस्रेण भूषिता काञ्चनप्रभा ।
ऐन्द्रदेवी सदाकालं शान्तिमाशु करोतु मे ।। 38

ऊर्ध्वकेशोत्कटा क्षामा निर्मांसस्नायुबन्धना ।
करालवदना घोरा खड्गखेटायुधोद्यता ।। 39

कपालमालिनी देवी क्रूरा खट्वाङ्गधारिणी ।
आरक्तपिङ्गनयना गजचर्मावगुण्ठिता ।। 40

नानानागपरीताङ्गी प्रेतोपरि निवासिनी ।
शिवरूपेण घोरेण शिवारावभयङ्करी ।। 41

चामुण्डा चण्डरूपेण चित्रा त्रासयते ननु ।
भूतप्रेतपिशाचेभ्यो मम रक्षां करो तु सा ।। 42

आकाशमातरो देव्यस्तथा भूलोकमातरः ।
भूतानां मातरः सर्वास्तथान्याः पितृमातरः ।। 43

सर्वमातृगणा देव्यः स्वायुधव्यग्रपाणयः ।
जगद्व्याप्यावतिष्ठन्त्यो बलिकामा महादयाः ।। 44

रुद्रभक्ता महावीर्या रुद्रार्चनपरायणाः ।
शान्तिं कुर्वन्तु मे नित्यं मातरः सुरपूजिताः ।। 45

ये रुद्रा रौद्रकर्माणो रुद्रस्थाननिवासिनः ।
सौम्याश्चैव तु ये केचित् सौम्यस्थाननिवासिनः ।। 46

मातरो रुद्ररूपाश्च गणानामधिपाश्च ये ।
विघ्नभूतास्तथैवान्ये दशदिक्षु समाचि(श्रि)ताः ।। 47

सर्वे सुप्रीतमनसः प्रतिगृह्णन्त्विमं बलिम् ।। 48

**ईश्वर उवाच**

माध्यामद्यं च(?)शान्तिं सुत तति धनगो वाजिमातङ्गयूथे-
राष्ट्रे ग्रामे पुरे वा सुविहितमधुना शान्तिदाःसन्तु सर्वाः ।।

।। इति श्रीशिवरहस्ये एकादशाम्शे
शान्त्यध्यायो नाम
सप्तत्रिंशोऽध्यायः ।।



## ।। अष्टत्रिंशोऽध्यायः ।।

**स्कन्द उवाच -**

सिद्धिं पुष्णन्तु मे नित्यं भयेभ्यः पान्तु मां सदा ।
ऐन्द्र्यां दिशि गणा ये तु वज्रहस्ता महाबलाः ।। 1

सुपीताक्षा पीतनिभास्तथा वै पीतलोहिताः ।
दिव्यान्तरिक्षभौमाश्च पातालतलवासिनः ।। 2

रुद्रार्चनरता नित्यं शान्तिं कुर्वन्तु मे सदा ।
आग्नेय्यां ये गणाः सर्वे शक्तिहस्ता निषङ्गिणः ।। 3

शिवप्रणामपरमाः शान्तिं कुर्वन्तु मे सदा ।
याम्यां दिशि गणाः ये तु सततं दण्डपाणयः ।। 4

सुकृष्णाक्षाः कृष्णनिभास्तथा वै कृष्णलोहिताः ।
दिव्यान्तरिक्षभौमाश्च पातालतलवासिनः ।। 5

परमेशार्चनरताः शान्तिं कुर्वन्तु मे सदा ।
निरृत्यां ये गणाः सर्वे राक्षसाः खड्गपाणयः ।। 6

सुनीलाक्षा नीलनिभास्तथा वै नीललोहिताः ।
दिव्यान्तरिक्षभौमाश्च पातालतलवासिनः ।। 7

रुद्रैकध्यान निरताः शान्तिं कुर्वन्तु मे सदा ।
वारुण्यां ये गणाः सर्वे सततं पाशपाणयः ।। 8

सश्यामाक्षाः श्यामनिभास्तथा वै श्यामलोहिताः ।
दिव्यान्तरिक्षभौमाश्च पातालतलवासिनः ।। 9

परमेशार्चनरताः शान्तिं कुर्वन्तु मे सदा ।
वायव्यां ये गणाः सर्वे सततं ध्वजपाणयः ।। 10

सूधूम्राक्षा धूम्रनिभास्तथा वै धूम्रलोचनाः ।
दिव्यान्तरिक्षभौमाश्च पातालतलवासिनः ।। 11

शिवभक्तिपराः सर्वे क्षेमं कुर्वन्तु मे सदा ।
कौबेर्यां ये गणाः सर्वे सततं निधिपाणयः ।। 12

सुपीताक्षाः पीतनिभास्तथा वै पीतलोहिताः ।
दिव्यान्तरिक्षभोमाश्च पातालतलवासिनः ।। 13

शिवभक्तिपराः सर्वे क्षेमं कुर्वन्तु मे सदा ।
ईशान्यां ये गणाः सर्वे प्रशान्ताः शूलपाणयः ।। 14

सुसूक्ष्माक्षाः सूक्ष्मनिभास्तथा वै सूक्ष्मलोहिताः ।
दिव्यान्तरिक्ष भौमाश्च पातालतलवासिनः ।। 15

रुद्रप्रणामपरमाः शान्तिं कुर्वन्तु मे सदा ।
अधोभागे गणा ये तु सततं चक्रपाणयः ।। 16

सुधूम्राक्षा धूम्रनिभास्तथा वै धूम्रलोहिताः ।
दिव्यान्तरिक्षभौमाश्च पातालतलवसिनः ।। 17

शिवभक्तिरताः सर्वे शान्तिं कुर्वन्तु मे सदा ।
ऊर्ध्व भागे स्थिता ये तु सततं पद्मपाणयः ।। 18

सुपद्माक्षाः पद्मनिभास्तथा वै पद्मलोहिताः ।
दिव्यान्तरिक्षभौमाश्च पातालतलवासिनः ।। 19



शिवपूजासमायुक्ताः शान्तिं कुर्वन्तु मे सदा ।
एते गणा महात्मानो महाबलपराक्रमाः ।। 19

शिवं सम्पूज्य यत्नेन स्वं स्वं पदमवापिरे ।
ततः सुप्रीतमनसः शान्तिमायुर्बलं श्रियम् ।। 21

प्रयच्छन्त्वाशु मर्त्यानां तद्भक्तानां विशेषतः ।
नाम्नाऽमरावती पूज्या पूर्वभागे व्यवस्थिता ।। 22

विद्याधरगणाकीर्णा सिद्धगन्धर्वसेविता ।
रत्नप्राकाररचिता महारत्नोपशोभिता ।। 23

तत्र देवपतिः श्रीमान् वज्रहस्तो महाबलः ।
नेत्राणां तु सहस्रेण शोभनेन विराजितः ।। 24

ऐरावतगजारूढो हेमवर्णो महाद्युतिः ।
देवेन्द्रः परमो हृष्टः परमेशार्चने रतः ।। 25

शिवध्यानैकसम्पन्नः शिवभक्तिपरायणः ।
शिवभक्तैस्तथा चान्यैर्देवैरिह सहानुगैः ।। 26

शिवप्रणामपरमः करोतु मम शान्तिकम् ।
आग्नेय्यास्तु दिशोभागे पुरी तेजोवती शुभा ।। 27

नानादेवगणाकीर्णा रत्नज्वालासमाकुला ।
तत्र ज्वालापरीताङ्गो दीप्त्याङ्गारसमद्युतिः ।। 28

भूतिकृद्देहिनां देवो ज्वलनः पापनाशनः ।
शिवपूजासमायुक्तः शिवध्यानविभावितः ।। 29

शान्तिं करोतु मे देवस्तथा पापपरिक्षयम् ।
वैवस्वतपुरीनाम दक्षिणस्यां व्यवस्थिता ।। 30

लोहप्राकारसंयुक्ता प्रासादैर्गोपुरैः शुभा ।
सुरासुरशतानीकपितृयक्षोरगालयः ।। 31

तत्रेन्द्रनीलसङ्काशो रत्नस्रग्वस्त्रभूषणः ।
खड्गपाणिर्महातेजाः करालवदनोज्ज्वलः ।। 32

राक्षसेन्द्रश्च निर्ऋतिः शिवार्चनरतः सदा ।
करोतु मे महाशान्तिं शिवभक्तिसमुत्सुकः ।। 33

पश्चिमे तु दिशो भागे पुरी शुद्धवती(शुद्धिमती) शुभा ।
नानारत्नसमाकीर्णा नानाकिन्नरसेविता ।। 34

तेजः प्राकारसङ्कीर्णा निरौपम्या सदोज्ज्वला ।
तत्र मौक्तिकसङ्काशः परिपिङ्गललोचनः ।। 35

श्वेतवस्त्रपरीधानः पाशहस्तो महाद्युतिः ।
वरुणः परया भक्त्या शिवैकाऽऽहितमानसः ।। 36

रोगशोकार्तिसन्तापं विनाशयतु मे सदा ।
वायव्ये तु दिशो भागे पुरीगन्धवती शुभा ।। 37

ऋषिसिद्धगणाकीर्णा हेमप्राकारतोरणा ।
तथा धूम्रेण देहेन कृष्णपिङ्गललोचनः ।। 38

पटवासान्तरालीनो ध्वजयष्ट्यायुधोज्ज्वलः ।
पवनः परमो देवः परमेश्वरभावितः ।। 39

क्षेमारोग्यबलं शान्तिं करोतु मम सर्वदा ।
महोदया नाम पुरी उत्तरेण व्यवस्थिता ।। 40



अनेकयक्षसङ्कीर्णा नानारत्नोपशेभिता ।
तत्र देवो गदाहस्तश्चित्रस्रग्वस्त्रभूषणः ।। 41

ह्रस्वबाहुर्महातेजाः परिपिङ्गललोचनः ।
कुबेरः श्रीमुखः श्रीमान् हरपादार्चने रतः ।। 42

शान्तिं करोतु मे प्रीतः शमशान्तेन चेतसा ।
यशोवती पुरी रम्या ऐशान्यां दिशि संस्थिता ।। 43

नानागणसमकीर्णा नानाकृतसुरालया ।
तेजःप्राकारपर्यन्ता निरौपम्यगुणान्विता ।। 44

तत्र मौक्तिकसङ्काशः शशाङ्ककृतशेखरः ।
त्रिणेत्रः शान्तरूपात्मा ह्यक्षमालाधरो हरः ।। 45

ईशानः परमो देवः शिवध्यानैकतत्परः ।
सोऽपि सर्वात्मभावेन शान्तिमाशु करोतु मे ।। 46

शान्ताः शिवार्चनरताः शिवपादसक्ताः
युक्ता मखायुतफलैर्वरभस्मभूषाः ।
रुद्राक्षवक्षस इमे शिवलिङ्गभक्ता
एते मदर्चनफलेन गणातामुपेताः ।। 47

।। इति श्रीशिवरहस्ये एकादशाम्शे शान्त्यध्यायो नाम अष्टत्रिंशोऽध्यायः ।।

## ।। एकोनचत्वारिंशोऽध्यायः ।।

ईश्वर उवाच -

भूलोके च भुवर्लोके स्वर्लोके च वसन्ति ये ।
देवदिव्यप्रभायुक्ताः शान्तिं कुर्वन्तु मे सदा ।। 1

महर्लोके जनोलोके तपोलोके च संस्थिताः ।
ते तु प्रमुदिता देवाः शान्तिं कुर्वन्तु मे सदा ।। 2

सत्यलोके च ये देवाः प्रभाज्वलितविग्राः ।
शिवभक्ताः सुमनसः भयार्तिं नाशयन्तु मे ।। 3

तपोलोके च ये देवाः शुद्धाः स्फटिकविग्रहाः ।
रुद्रभक्ता महात्मानः शिवं कर्वन्तु मे सदा ।। 4

जनोलोके च ये देवा धौतचामीकरप्रभाः ।
ईशानं प्रणता नित्यं शान्तिं कुर्वन्तु मे सदा ।। 6

भुवर्लोके च ये देवा भासयन्तो दिशो दश ।
शिवैकशरणा देवाः पापं प्रशमयन्तु मे ।। 7

गिरिकन्दरदुर्गेषु निवसन्ति च ये नराः ।
रुद्रार्चनरता नित्यं शान्तिं कुर्वन्तु मे सदा ।। 8

शरच्चन्द्रांशुगौरेण देहेनामिततेजसा ।
सरस्वती  शिवे भक्ता शान्तिमाशु करोतु मे ।। 9

चारुचामीकरप्रख्या सरोजकरपल्लवा ।
शिवभक्ता च श्रीदेवी श्रीमद्भुक्तिं ददातु मे ।। 10



चारुणा मुखचन्द्रेण विचित्रकनकोज्ज्वला ।
जया देवी शिवे भक्ता सर्वान् कामान् ददातु मे ।। 11

हारेण सुविचित्रेण भास्वत्कनकमेखला ।
पराजिता रुद्रभक्ता करोतु विजयं मम ।। 12

सिन्दूरारुणवर्णेन देहेनायतलोचनः ।
सहस्रकिरणः श्रीमान् सप्तसप्तिकवाहनः ।। 13

गभस्तिमाली भगवान् शिवपादार्चने रतः ।
करोतु मे महाशान्तिं ग्रहपीडानिवारणम् ।। 14

जगदाप्यायनकरोऽप्यमृतांशुः सुशीतलः ।
सोमः सौम्येन भावेन ग्रहपीडां व्यपोहतु ।। 15

पद्मरागेण देहेन देवः पिङ्गललोचनः ।
अङ्गारकस्तु सततं रुद्रपूजापरायणः ।। 16

रुद्रसद्भावसम्पन्नो रुद्रध्यानैकतत्परः ।
ग्रहपीडाभयं सर्वं विनाशयतु मे सदा ।। 17

कुङ्कुमछविना श्रीमान् देहेनाऽऽरक्तपिङ्गलः ।
बुधोऽपि शिवधामात्मा ग्रहपीडां व्यपोहतु ।। 18

तप्तचामीकराभो यः सर्वज्ञानसुधालयः ।
बृहस्पतिः सदाकालमीश्वरार्चनतत्परः ।। 19

सोऽपि शान्तात्मचित्तेन परमेण समाधिना ।
ग्रहपीडां विनिर्जित्य करोतु विजयं मम ।। 20

हिमकुन्देन्दुतुल्याभोऽसुरदैत्येन्द्रपूजितः ।
शुक्रः शिवार्चको नित्यं ग्रहपीडां व्यपोहतु ।। 21

भिन्नाञ्जनसमच्छायः सुरक्तनयनद्युतिः ।
शनैश्चरः शिवे भक्तः ग्रहपीडां व्यपोहतु ।। 22

धूम्रायमाणः सततं सर्वोत्पातसमन्वितः ।
नीलाञ्जनसमः श्रीमान् सैह्मिकेयो महाद्युतिः । 23

शिवपूजारतो राहुः ग्रहपीडां व्यपोहतु ।
धूम्रायमाणः सततं सर्वोत्पातसमन्वितः ।। 24

शिवार्चनरतः केतुर्ग्रहपीडां व्यपोहतु ।
एते ग्रहा महात्मानः शिवार्चनपरायणाः ।। 25

शान्तिं कुर्वन्तु मे ह्रष्टाः सदाकालं हितैषिणः ।
मुखे यस्य स्थितो नित्यं व्युष्टिर्नाम महाबलः ।। 26

सुमुखो विघ्नकारी च पृष्ठे च विजयङ्करः ।
रुद्रप्रणामपरनः शान्तिमाशु करोतु मे ।। 27

तृतीया सप्तमी चैव दशमी च चतुर्दशी ।
चतुर्थी चाष्टमी चैव एकादशी च पूर्णिमा ।। 28

एता विघ्नकरा भक्ताः शुक्लकृष्णसमुद्भवाः ।
भवन्तु मे श्रियो नित्यं कुर्वन्तु विजयं सदा ।। 29

अमावास्या महापुण्या पितृदेवसमन्विता ।
शिवा ह्येषा तु परमा शिवस्य परमात्मनः ।। 30



शिवतेजःसमायुक्ताः करोतु मम शान्तिकम् ।
प्रतिपद्वह्निसंयुक्ता अष्टमी रुद्रसंयुता ।। 31

नवमी तिथिरत्युग्रा दुर्गादेव्यधिदेवता ।
दशमी धर्मसंयुक्ता रुद्रेणैकादशीयुता ।। 32

द्वादशी विष्णुसंयुक्ता मदनेन त्रयोदशी ।
चतुर्दशी महेशेन पूर्णिमा तुहिनांशुना ।। 33

एतस्तु तिथयः सर्वा ईशानार्चनतत्पराः ।
शान्तिं कुर्वन्तु मे नित्यं सदाकालं हितैषिणः ।। 34

विष्कम्भः प्रीतिरायुष्मान् सौभाग्यं शोभनं तथा ।
अतिगण्डः सुकर्मा च धृतिः शूलस्तथैव च ।। 35

गण्डो वृद्धिर्ध्रुवश्चैव व्याघातो हर्षणस्तथा ।
वज्रंसिद्धिर्व्यतीपातो वरीयान् परिघः शिवः ।। 36

सिद्धः साध्यः शुभः शुभ्रो ब्राह्ममाहेन्द्रवैधृताः ।
चन्द्रस्य भानोरुत्पन्ना ये ते योगा महाबलाः ।। 37

शिवशक्तियुताः सर्वे शिवशक्तिविधायिनः ।
शान्तिं कुर्वन्तु मे नित्यं शिवध्यानपरायणाः ।। 38

कृत्तिका परमा देवी रोहिणी रुचिरानना ।
श्रीमान् मृगशिरा भद्रा आर्द्रा च परमोज्ज्वला ।। 39

पुनर्वसुस्तथा पुष्य आश्लेषा च महोज्ज्वला ।
नक्षत्रमातरो ह्येताः प्रभामालावभासकाः ।। 40

महादेवार्चनरता महादेवानुभाविताः ।
पूर्वभागे स्थिताश्चैताः शान्तिं कुर्वन्तु मे सदा ।। 41

मघा सर्वगुणोपेता पूर्वा चैव तु फल्गुनी ।
उत्तरा फल्गुनी चेष्टा हस्तचित्ररथोत्तमा ।। 42

स्वाती विशाखा वरदा दक्षिणस्थानसंस्थिता ।
अर्चयन्त्यः सदा कालं देवं त्रिणयनं प्रभुम् ।। 43

ममापि शान्तिं चैवैताः कुर्वन्तु शिवचोदिताः ।
अनूराधा तथा ज्येष्ठा मूला बुद्धिसमत्विता ।। 44

पूर्वाषाढा महावीर्या आषाढात्युत्तरा शुभा ।
अभिजिन्नाम नक्षत्रं श्रवणं परमोत्तमम् ।। 45

एताः पश्चिमतो दीप्ताः राजन्त्यश्चारुमूर्तयः ।
ईशानं पूजयन्त्येताः सर्वकालं सुमैः शिवे।। 46

प्रशान्तिं मम कुर्वन्तु विभूतिं च समाहिताः ।
श्रविष्ठा शतभिषक् चैव पूर्वा भाद्रपदा तथा ।। 47

उत्तरा भाद्ररेवत्यावश्विनी च महर्धिका ।
भरणी च महावीर्या नित्यमुत्तरतः स्थिताः ।। 48

शिवार्चनरता नित्यं शिवैकगतमानसाः ।
शान्तिं कुर्वन्तु मे नित्यं सर्वकालं सुखोदयाः ।। 49

अथ मेषो मृगाधीशो धनुर्दीप्तिमतां वरः ।
पूर्वेण भासयन्त्येते शिवपूजापरायणाः ।। 50



शान्तिं कुर्वन्तु मे नित्यं बलं सौभाग्यमेव च ।
वृषः कन्या च वरदा मकरश्च महार्थकः ।। 51

हरपादरता नित्यं शिवभावेन भाविताः ।
एते दक्षिणदिक्संस्थाः पूजयन्ति सदाशिवम् ।। 52

भक्त्या च परया नित्यं शान्तिं कुर्वन्तु मे सदा ।
मिथुनं च तुलाकुम्भौ पश्चिमस्यां दिशि स्थिताः ।। 53

शिवपादार्चनरताः शान्तिं कुर्वन्तु मे सदा ।
कर्कटो वृश्चिको मीनो ह्येते उत्तरतः स्थिता ।। 54

यजन्त्येते सदा कालं रुद्रं भुवननायकम् ।
शान्तिं कुर्वन्तु मे नित्यं शिवज्ञानविधायिनः ।। 55

ऋषयः सत्य विख्याता ध्रुवान्ताः परमेज्ज्वलाः ।
भस्मरुद्राक्षभूषाढ्या त्रिपुण्ड्रपरिमण्डिताः ।। 56

शिवलिङ्गार्चनपरास्त्रिकालममितौजसः
कश्यपो गालवो गार्ग्यो विश्वामित्रो महामुनि ।
भृगुर्दक्षो वसिष्ठश्च मृकण्डुः पुलहः क्रतुः
नारदो मुनिरत्रिश्च भरद्वाजोऽङ्गिराः मुनिः ।। 58

वाल्मीकिः कौशिकः कर्णः शाकल्योऽथ पुनर्वसुः ।
शाकलायन(आश्वलायन)इत्याद्या मुनयोऽथ तपस्विनः ।।59

शिवध्यानार्चनोद्युक्ताः शान्तिं कुर्वन्तु मे सदा ।
ऋषिपत्न्यो महाभागाः ऋषिकन्याः कुमारकाः ।। 60

शिवार्चनरता नित्यं शान्तिं कुर्वन्तु मे सदा
कुर्वन्तु शान्तिं विविधां सुरोत्तमाः ।
शिवार्चका भस्मत्रिपुण्ड्रभूषिताः ।
लिङ्गार्चकाः शाश्वतधर्मयुक्ताः
युक्ता भवन्त्येव शिवप्रसादात् ।।

।। इति श्रीशिवरहस्ये एकादशाम्शे
शान्त्यध्यायो नाम
एकोनचत्वारिंशोऽध्यायः ।।



## ।। चत्वारिंशोऽध्यायः ।।

**ईश्वर उवाच -**

सिद्धाश्च सिद्धतपसो गन्धर्वाप्सरसां गणाः ।
विद्याधरा महात्मानो गरुडश्च महार्थकः ।। 1

महेश्वरपरा ह्येते महेश्वरपदार्चकाः ।
सिद्धिमाशु प्रयच्छन्तु शिवधर्मपरायणाः ।। 2

नमुचिर्दैत्यराजेन्द्रः शम्भुपूजापरायणः ।
महानादोऽपि विख्यातो दैत्यः परमवीर्यवान् ।। 3

हाटकेश्वरदेवस्य नित्यं पूजापरायणः ।
बलं वीर्यं च मे क्षिप्रं प्रयच्छन्तु महार्थकाः ।। 4

महाजम्भोहयग्रीवः प्रह्लादो दैत्यपुङ्गवः ।
तारकाग्निमुखा दैत्या कालनेमिर्महाबलः ।। 5

एते दैत्या महात्मानः शिवसद्भावभाविताः ।
पुष्टिं बलं तथा वीर्यं प्रयच्छन्तु च मे सुखम् ।। 6

वैरोचनो हिरण्याक्षः सुपर्वा च सुलोमकः ।
मुचुकुन्दः सुकण्ठश्च दैत्यो रोचनकस्तथा ।। 7

भावेन परमेणाशु यजन्तः सर्वदा शिवम् ।
सततं शितभावेन पुष्टिं कुर्वन्तु मे सदा ।। 8

आरक्तेन शरीरेण रक्तान्तायतलोचनः ।
महाभोगकृताटोपः शङ्खाब्जकृतलाञ्छनः ।। 9

अनलो नागराजेन्द्रः शिवपादार्चने रतः ।
महापापविषं हृत्वा शान्तिमाशु करोतु मे ।। 10

सुखेन सुशरीरेण सुश्वेतोत्पलशेखरः ।
चारुभोगकृताटोपश्चारुहारविभूषणः ।। 11

वासुकिर्नागराजेन्द्रः शिवपादार्चने रतः ।
सर्वरोगविषं हृत्वा क्षेमारोग्यं ददातु मे ।। 12

अतिप्रीतेन देहेन प्रस्फुरद्भोगसम्पदा ।
तेजसा चातिदीप्तेन कृतस्वस्तिकलक्षणः ।। 13

नागेन्द्रस्तक्षकः श्रीमान्नागकोट्या समन्वितः ।
विषशस्त्रादिसन्तापं हत्वा शान्तिं करोतु मे ।। 14

पद्मवर्णेन देहेन पद्मपत्रायतेक्षणः ।
पद्मबिन्दुकृताभासो ग्रीवायामेकरेखया ।। 15

ख्यातः पद्मो महानागः शिवपादार्चनेरतः ।
करोतु मे महाशान्तिं महापापविषक्षयम् ।। 16

पुण्डरीकनिभेनापि देहेनामिततेजसा ।
शङ्खशूलाब्जरुचिरैर्भूषितो मूर्ध्नि बिन्दुभिः ।। 17

महापद्मोमहानागो हरपादार्चने रतः ।
विनिहत्य विषं घोरं शान्तिमाशु करोतु मे ।। 18

शङ्खपालः श्रिया दीप्तः शिवपादाब्जपूजकः ।
महाविषं महाघोरं शान्तिमाशु करोतु मे ।। 20



अतिगौरेण देहेन चन्द्रार्धकृतशेखरः ।
दीप्तभोगः कृताटोपः शम्भुलक्षणलक्षितः ।। 21

गुलिको नागराजेन्द्रो नित्यं हरपरायणः ।
अपहृत्य विषं घोरं करोतु विषशान्तिकम् ।। 22

अन्तरिक्षे च ये नागा ये नागा भुवि संस्थिताः ।
पाताले संस्थिता नागाः सर्वेऽप्यत्र समन्विताः ।। 23

रुद्रपादार्चनोद्युक्ताः शान्तिं कुर्वन्तु मे सदा ।
नागिन्यो नागकन्याश्च तथा नागकुमारिकाः ।। 24

शिवभक्ताः सुमनसः शान्तिं कुर्वन्तु मे सदा ।
य इदं नाग संस्थानं कीर्तयेद्वा श्रृणोति वा ।। 25

न तं नागा विहिंसन्ति विषं नाक्रमते सदा ।
गङ्गा पुण्या महादेवी यमुना नर्मदा नदी ।। 26

गोमती चापि कावेरी वरुणा देवकी तथा ।
सर्वभूतपतिं देवं परमेशं महेश्वरम् ।। 27

पूजयन्ति सदा नद्यस्सदा तद्भावभाविताः ।
शान्तिं कुर्वन्तु मे नित्यं सदा पापपरीक्षकाः ।। 28

चन्द्रभागा महापुण्या नदी गोदावरी शुभा ।
सरयूः गण्डकी श्रेष्ठा कौशिकी च सरस्वती ।। 29

पम्पा वेगवती पुण्या श्रेष्ठा विष्णुनदी तथा ।
एता नद्यो महाभागाः शिवपादार्चने रताः ।। 30

शान्तिं कुर्वन्तु मे नित्यं शिवध्यानैकमानसाः ।
नैरञ्जना नाम नदी शोणश्चापि महाह्लदः ।। 31

मन्दाकिनी च परमा सदा सन्निहिता शुभा ।
एताश्चान्या महानद्यो भूमिदिव्यन्तरिक्षगाः ।। 32

रुद्रार्चनपरा नद्यः कुर्वन्तु मम शान्तिकम् ।
गुह्यानि यानि तीर्थानि आसमुद्रात्सरांसि च ।। 33

कुर्वन्तु शान्तिकं तानि कीटकाधिष्ठितानि च ।
महावैश्रवणो देवो यक्षराजो महार्धिकः ।। 34

यक्षकोटिपरीवारः यक्षाऽसङ्ख्येय संयुतः ।
महाविभवसम्पन्नो हरपादार्चने रतः ।। 35

शान्तिं करोतु मे प्रीतः पद्मपत्रायतेक्षणः ।
माणिभद्रो महायक्षो मणिरत्नविभूतः ।। 36

मनोहरेण हारेण कण्ठलग्नेन राजते ।
शिवध्यानपरो नित्यं शिवपादाब्जपूजकः ।। 37

शान्तिं करोतु मे नित्यं सर्वरोगनिवारणम् ।
यक्षिणी यक्षकन्याभिः परिवारितविग्रहा ।। 38

रुद्रार्चनरता नित्यं करोतु मम शान्तिकम् ।
सुवीरो नाम यक्षेन्द्रो मणिकुण्डलभूषणः ।। 39

ललाटहेमपट्टेन शोभनेन विराजितः ।
बहुयक्षसमाकीर्णो यक्षैर्नमितविग्रहः ।। 40



शिवपूजारतो नित्यं करोतु मम शान्तिकम् ।
पञ्चगो नाम यक्षेन्द्रः कर्णिकाकटकोज्ज्वलः ।। 41

मकुटेन विचित्रेण केयूराभ्यां विराजितः ।
यक्षकन्यासमायुक्तो यक्षकोटिसमन्वितः ।। 42

हरार्चनरतः श्रीमान् करोतु मम शान्तिकम् ।
श्रीमान् विभण्डको यक्षो नानारत्नविभूषितः ।। 43

चारुकुण्डलयुग्मेन कर्णे नित्यं विराजितः ।
यक्षेन्द्रो यक्षनमितो यक्षसेनापतिर्बुधः ।। 44

हरपादार्चनरतः करोतु मम शान्तिकम् ।
धृतराष्ट्रो महातेजाः यक्षो यक्षाधिपः प्रभुः ।। 45

दिव्यपट्टांशुकछन्नो मणिकाञ्चनभूषणः ।
शिवप्रसादसमपन्नः करोतु मम शान्तिकम् ।। 46

शिवप्रसादसम्पन्नः करोतु मम शान्तिकम् ।
पूर्णभद्रो महायक्षो सर्वालङ्कारभूषितः ।। 47

रत्नदीप्तेन देहेन पट्टेनातिविराजितः ।
यक्षकोटिसहस्रेण परिवारितविग्रहः ।। 48

रुद्रप्रणामपरमो रुद्रभक्तिसमन्वितः ।
रुद्रार्चनसमायुक्तः करोतु मम शान्तिकम् ।। 49

सूत उवाच -

शान्तिं कुर्वन्तु सर्वे हरपदकमलोदारभावैक भृङ्गा
यक्षास्त्र्यक्षपदाम्बुजार्चनरता नागाःसदा पान्तु माम् ।
सद्योजातप्रियाभिः गिरिवरजनिता पुण्यनद्योऽपि सद्यः
पापं मे प्रविनाशयन्तु सततं शर्वार्चनासूद्यताः ।। 50

।। इति श्रीशिवरहस्ये एकादशांशे
शान्त्यध्यायो नाम नाम
चत्वारिंशोऽध्यायः ।।



## ।। एकचत्वारिंशोऽध्यायः ।।

ईश्वर उवाच -

विरूपाक्षश्च यक्षेन्द्रः श्वेतवासा महाद्युतिः ।
चारुकाञ्चनमालाभिः किङ्किणीरवकाञ्चितः ।। 1

विभूषितः सदाकालं वरदानैकतत्परः ।
रुद्रपूजाकरो नित्यं करोतु मम शान्तिकम् ।। 2

अन्तरिक्षे च ये यक्षा ये यक्षाः सर्वसंस्थिताः ।
गिरिकन्दरदुर्गेषु ये यक्षा भूतिवासिनः ।। 3

पातालवासिनो यक्षा नानारूपायुधोद्यताः ।
शिवभक्ताः सुमनसः शिवपूजासमुत्सुकाः ।। 4

शान्तिं कुर्वन्तु मे हृष्टाः शान्ताः शान्तेन तेजसा ।
यक्षिण्यो विविधाकारास्तथा यक्षकुमारकाः ।। 5

यक्षकन्या महाभागाः शिवध्यानैकतत्पराः ।
शान्तिं स्वस्त्ययनं क्षेमं बलं कल्याणमेव च ।। 6

सिद्धिमाशु प्रयच्छन्तु नित्यमेव समाहिताः ।
पर्वताः सर्वतः सर्वे पर्वत्यश्च महर्धिकाः (?) ।। 7

शिवभक्ताः सुमनसः शान्तिं कुर्वन्तु मे सदा ।
समुद्राः सरितः सर्वे सागराश्च महर्धिकाः ।। 8

रत्नगर्भाश्च विविधा ये चान्ये सागरा भुवि ।
रुद्रपूजापरा नित्यं कुर्वन्तु मम शान्तिकम् ।। 9

राक्षसाः सर्वतः सर्वे राक्षसा घोरारूपिणः ।
राक्षसा ये महावीर्या राक्षसाश्च महाबलाः ।। 10

स्थलस्था राक्षसा ये च अन्तरिक्षे च राक्षसाः ।
पाताले राक्षसा ये तु नित्यं रुद्रार्चने रताः ।। 11

भैरवं यस्य रूपं तु प्रेतभस्मावगुण्ठितन् ।
अनेकरूपधारिण्यो डाकिन्यश्च महाबलाः ।। 12

अन्तरिक्षगता याश्च डाकिन्यः स्वर्गसंस्थिताः ।
पाताले भूतले याश्च गिरिदुर्गेषु याः स्थिताः ।। 13

रुद्रप्रणामपरमा रुद्रपूजापराः स्थिताः ।
तृतीयं लोचनं खड्गं त्रिशूलं करपल्लवे ।। 14

तेजसा तस्य देवस्य शान्तिं कुर्वन्तु मे सदा ।
सर्वतो भूतरूपाढ्या महाभूता महोज्ज्वलाः ।। 15

सर्वभूतस्थिताः सौम्याः सर्वे भूता मनोजवाः ।
अन्तरिक्षे च ये भूता ये भूता भुवि संस्थिताः ।। 16

पाताले भूतले भूता ये च भूतास्त्रिधामकाः ।
खट्वाङ्गं यस्य विमलं कपालं करपल्लवे ।। 17

तेजसा तस्य देवस्य शान्तिं कुर्वन्तु मे सदा ।
प्रेताः प्रेतगणाः सर्वे सुप्रीताः सर्वतोमुखम् ।। 18

अन्तरिक्षे च ये प्रेता ये प्रेता दिवि संस्थिताः ।
पाताले भूतले चैव ये प्रेताः कामरूपिणः ।। 19



स्मशानं निलयो यस्य वृषभो यस्य वाहनम् ।
तेजसा तस्य देवस्य शान्तिं कुर्वन्तु मे सदा ।। 20

ये पिशाचा महावीर्या ये पिशाचा महर्धिकाः ।
ये पिशाचा भीषणाश्च पिशाचाः कामरूपिणः ।। 21

नानारूपधराः सर्वे सर्वे सत्वगुणोत्तराः ।
अन्तरिक्षे पिशाचा ये स्वर्गे ये च पिशाचकाः ।। 22

भूतले ये पिशाचा ये पातालतलवासिनः ।
चन्द्रार्धं मस्तके यस्य यस्य भस्म विभूषणम् ।। 23

तेजसा तस्य देवस्य शान्तिं कुर्वन्तु मे सदा ।
अपस्मारग्रहाः सर्वे सर्वे चापि ज्वरग्रहाः ।। 24

गर्भबालग्रहा ये तु नानारोगग्रहाश्च ये ।
अन्तरिक्षे ग्रहा ये च स्वर्गे ये च ग्रहोत्तराः ।। 25

पाताले भूतले ये च ये ग्रहाः सर्वतो दिशः ।
कण्ठे यस्य महानीलं भूषणं यस्य पन्नगाः ।। 26

तेजसा तस्य देवस्य शान्तिं कुर्वन्तु मे सदा ।
इति देवादयः सर्वे शिवज्ञानविधायिनः ।। 27

कुर्वन्तु शान्तिं जगतः शिवपक्तेषु सर्वदा ।
शिवज्ञानपरो भूत्वा स्तुत्वैवं शिवभक्तकान् ।। 28

शिवध्यानपरो भूत्वः एतत्स्तोत्रमुदीरयेत् ।
इत्युक्त्वा देवदेवस्य सन्निधौ नन्दिकेश्वरः ।। 29

कृताञ्जलिपुटो भूत्वा देवं तुष्टाव हृष्टधीः ।

**नन्दिकेश्वर उवाच -**

जयात्मयोगसंस्थाय जय संशुद्धचेतसे ।। 30

जयदानेकरूपाय जयेशाय नमोऽस्तु ते ।
जयोत्तमाय देवाय जयकल्याणरूपिणे ।। 31

जय प्रणष्टमोहाय जयाजय्याय ते नमः ।
जय शर्वाय देवाय सर्वेशाय महात्मने ।। 32

जयलक्ष्मीविधानाय जय कीर्तिविधायिने ।
जय वाक्यविशुद्धाय अतीताय नमो नमः ।। 33

जय विष्विन्द्रवन्द्याय शिवशान्ताय ते नमः ।
जय विज्ञानशुद्दाय सर्वव्यापिन्नमो नमः ।। 34

जय कान्तार्धदेहाय जय चन्द्रार्धधारिणे ।
जय देवाधिदेवाय जय रुद्राय ते नमः ।। 35

जय त्रिभुवनेशाय जय विख्यातमूर्तये ।
जयाधाराय शर्वाय जगत्कर्त्रे नमो नमः ।। 36

जय निर्मलदेहाय जय सर्वार्थदायिने ।
जय भर्त्रे च हन्त्रे च जय त्रिपुरभेदिने ।। 37

जय मन्मथनाशाय सर्वेशाय नमो नमः ।

**स्कन्द उवाच -**

जैगीषव्य महाभाग शिवप्रोक्ताश्च शान्तयः ।। 30



सर्वेषां शान्तिकाध्यायान् श्रुत्वा भक्तियुताश्च ये ।
इत्येवं शान्तिकाध्यायं यः पठेच्छृणुयादपि ।। 39

विधूय सर्वपापानि शिवलोके महीयते ।
कन्यार्थी लभते कन्यां जयार्थी जयमाप्नुयात् ।। 40

मोक्षार्थी लभते मोक्षं धनार्थी धनमाप्नुयात् ।
अर्थकामो लभेदर्थं पुत्रकामो बहून् सुतान् ।। 41

विद्यार्थी लभते विद्यां योगार्थी योगमाप्नुयात् ।
राज्यार्थी लभते राज्यं ग्रामार्थी ग्राममाप्नुयात् ।। 42

गर्भिणी लभते पुत्रं कन्या विन्दति सत्पतिम् ।
यो यान् कामयते कामान् मानवः श्रवणादिह ।। 43

तत्सर्वं शीघ्रमाप्नोति देवानां च प्रियो भवेत् ।
श्रुत्वाऽध्यायमिमं पुण्यं सङ्ग्रामं प्रविशेन्नृपः ।। 44

स निर्जित्याशु शत्रून् वै कल्याणैः परिपूर्यते ।
अक्षयं मोदते कालं अतिरस्कृतशासनः ।। 45

सर्वव्याधिविनिर्मुक्तः पुत्रपौत्रैः प्रतिष्ठितः ।
शान्त्यध्यायमिमं पुण्यं उद्दिश्यापि सकृत्पठेत् ।। 46

तस्य रोगा न बाधन्ते वातपित्तादिसम्भवाः ।
नाऽकालमरणं तस्य सर्पैश्चापि न दश्यते ।। 47

विषं नाक्रमते देहे न जडत्वं न मूकता ।
नोपसर्गभयं तस्य नचोत्पातभयं तथा ।। 48

नाभिचारकृतैर्दोषैर्लिप्यते स कदाचन ।
सर्वकामसमृद्धार्थो यः पठेत्तु दिने दिने ।। 49

नित्यमूर्जितभक्त्या च *व्याघातादि विवर्जितः ।
यत्पुण्यं सर्वतीर्थानां गङ्गादीनां विशेषतः ।। 50

यत्पुण्यं कोटिगुणितं प्राप्नोति श्रवणादिह ।
दशानां राजसूयानां अग्निष्टोमशतस्य च ।। 51

श्रवणात्फलमाप्नोति कोटिकोटिगुणोत्तरम् ।
कोटिजन्मसु यत्पुण्यं जनार्दनसुपूजया ।। 52

तत्पुण्यं कोटिगुणितं प्राप्नोति श्रवणादिह ।
अवध्यः सर्वभूतानां अन्येषां च विशेषतः ।। 53

जीवेद्वर्षशतं साग्रं सर्वव्याधिविवर्जितः ।
गोघ्नश्चैव कृतघ्नश्च भ्रूणहा गुरुतल्पगः ।। 54

शरणागतघाती च मित्रविश्वासघातकः ।
दुष्टपापसमाचारः मातृहा पितृहा तथा ।। 55

श्रवणादस्य भावेन मुच्यते सर्वपातकैः ।
शान्त्यध्यायमिमं पुण्यं न देयं यस्य कस्यचित् ।। 56

शिवभक्ताय दातव्यं शिवेन कथितं पुरा ।
नित्यमूर्जितभक्तिश्च भक्तिव्याघातवर्जितः ।। 57

* दुर्गव्याघातवर्जितः ।



सर्वकामसमृद्धार्थो यः पठेत्तु दिने दिने ।
तस्माद् भक्त्या पुण्यदोऽयं श्रोतव्यः शिवमिच्छता ।। 58

**ईश्वर उवाच -**

शान्त्यध्यायवरान् शिवे हृदि गतान् कुर्वन् स शान्तिं लभेत्
रोगाणामयुतात् तथा नृपभयाद्भूपोऽपि मुक्तो भवेत् ।
चोरारिप्रभवादथोग्रहभवापस्मारदोषाद् ग्रहै-
सद्यो मुच्यत एव शान्तिकजपाद्भतोऽथ मुक्तो भवेत् ।। 59

युक्ता एव भवन्ति शुद्धहृदया मय्येव सक्ताः शिवे
शश्वत्ते भुवनावने द्विजवराःस्वालोकने किम्पुनः ।
व्यक्ताव्यक्तगतीषु तेषु सुलभो मोक्षोऽक्षताङ्गेषु वै
वक्तव्यं किमुमासहाय चरणाम्भोजप्रभावादराः ।। 60

।। इति श्रीशिवरहस्ये एकादशांशे
शान्त्यध्यायफलकथनं नाम
एकचत्वारिंशोऽध्यायः ।।

## ।। द्विचत्वारिंशोऽध्यायः ।।

**स्कन्द उवाच -**

ये स्मरन्ति सदाकालमीशानं पूजयन्ति वा ।
रुद्रलोकात्परिभ्रष्टा विज्ञेयास्ते गणेश्वराः ।। 1

अग्निहोत्राश्च वेदाश्च यज्ञाश्च बहुदक्षिणाः ।
शिवलिङ्गार्चनस्यैव कोट्यंशेनापि नो समाः ।। 2

सदा यजति यज्ञेन सदा दानं प्रयच्छति ।
सदा स वायुभक्षः स्यात् सदा योगं चरेदपि ।। 3

यः शिवं पूजयेन्नित्यं प्रणमेद्वापि भक्तितः ।
तस्य योगं च मोक्षं च शिवः प्रीतः प्रयच्छति ।। 4

यः कुर्यादर्चनं मासमेकाहारो जितेन्द्रियः ।
स यत्फलमवाप्नोति न तत्सर्वैर्महामखैः ।। 5

पौर्णमास्याममावास्यां चतुर्दश्यष्टमीषु च ।
(पूर्णिमायाममायां च चतुर्दश्यष्टमीषु च ।)
स्नापयित्वाम्भसा नित्यं सर्वयज्ञफलं लभेत् ।। 6

कृष्णपक्षे त्रयोदश्यामुपोष्य परमेश्वम् ।
प्रातर्मध्याह्नयोः पूजां चतुर्दश्यां समारभेत् ।। 7

पञ्चगव्यं सकृत्पीत्वा हविर्भुञ्जीत वाग्यतः ।
दशानामश्वमेधानां फलं प्राप्नोति मानवः ।। 8



कृष्णाष्टम्यामुपोष्याथ शङ्करं योऽर्चयेत्तु सः ।
प्राप्नोति परमं स्थानं यत्र देवो महेश्वरः ।। 9

ब्रह्मचारी शुचिर्भूत्वा त्रिसन्ध्यं योऽर्चयेच्छिवम् ।
त्रिसप्तकुलमुद्धृत्य शिवलोके महीयते ।। 10

दानोपवासनियमैः पूजाजागरभोजनैः ।
महास्नानादिविधिना शिवं पर्वसु पूजयेत् ।। 11

यावच्च सर्वकालेषु यावदर्चयते शिवम् ।
तावत्कालार्चनं पुण्यं तावत्कालार्चनाल्लभेत् ।। 12

स्नात्वा पर्वसु यत्नेन यथाविभवविस्तरैः ।
पूजनीयः शिवो नित्यं महापुण्यजिगीषया ।। 13

नैरन्तर्येण षण्मासान् विधिना पूज्य शङ्करम् ।
पुण्यं तदेव लभते त्रिकालं विषुवार्चनात् ।। 14

एवमेव फलं ज्ञेयं ग्रहणायनयोरपि ।
सङ्क्रान्तौ च दिने छिद्रे षडशीतिमुखेषु च ।। 15

मासैश्चतुर्भिर्यत्पुण्यं विधिना पूज्य शङ्करम् ।
तत्कार्तिक्या भवेत्पुण्यं पौर्णमास्यां शिवार्चनात् ।। 16

पुण्यं तदेतत्फाल्गुन्याममायामेवमेव च ।
चातुर्मास्यार्चनादेतन्महत्पुण्यफलं भवेत् ।। 17

माघमासे समुद्दिश्य त्रिसन्ध्यमर्चयेच्छिवम् ।
लभेत् षाण्मासिकं पुण्यं मासेनैव न संशयः ।। 18

यथा माघे तथाऽऽषाढे मासे चैव तु कार्तिके ।
त्रिषु पुण्यं समं ज्ञेयं मासेष्वेतेषु यत्कृतम् ।। 19

चातुर्दश्याममायां च पौर्णमास्यां च पाक्षिकम् ।
पुण्यमष्टगुणं ज्ञेयमष्टम्यामर्चयेच्छिवम् ।। 20

यः प्रदद्याद्गवां लक्षं दोग्ध्रीणां वेदपारगे ।
एकाहं योऽर्चल्लिङ्गं तस्य पुण्यं ततोऽधिकम् ।। 21

मासे मासे तु योऽश्नीयाद्यावज्जीवं सकृन्नरः ।
यश्चार्चयेत्सकृल्लिङ्गं सममेव न संशयः ।। 22

एतेन क्रमयोगेन पुण्यवृद्धिर्दिने दिने ।
यः पुनः सङ्गमुत्सृज्य इदमब्दं प्रपूजयेत् ।। 23

नैरन्तर्याच्छतगुणं तस्य पुण्यविवृद्धये ।
पञ्चाशद्गुणितं पुण्यमब्दोर्ध्वं योऽर्चयेच्छिवम् ।। 24

ऋतावृतौ तदर्धं स्यान्मासे मासे तदर्धकम् ।
मासार्धमपि यो लिङ्गं नैरन्तर्येण पूजयेत् ।। 25

पुरुषोत्तमः शिवो ज्ञेयो नैरन्तर्यं हि दुष्करम् ।
प्रातरुत्थाय यो लिङ्गं सकृद्भक्त्या प्रपूजयेत् ।। 26



कपिलानां शतं दत्वा यत्पुण्यं तदवाप्नुयात् ।
मध्यं दिनकरे प्राप्ते यो लिङ्गं पूजयेन्नरः ।। 27

सम्पूर्णां पृथिवीं दत्वा यत्पुण्यं तदवाप्नुयात् ।
वारुणीमाश्रिते सूर्ये यः शिवं सम्प्रपूजयेत् ।। 28

गवां शतसहस्रस्य दत्तस्य फलमाप्नुयात् ।
यो लिङ्गमर्धरात्रे तु शुचिर्भूत्वा प्रपूजयेत् ।। 29

अग्निष्टोमसहस्रस्य धर्मस्य लभते फलम् ।
एवं वेलासु सर्वासु अवेलास्वापि शङ्करम् ।। 30

सम्पूजयेन्नरो भक्त्या सर्वान् कामानवाप्नुयात् ।
शिवलिङ्गं महापुण्यं सर्वदेवनमस्कृतम् ।। 31

यः स्पृशेदपि पाणिभ्यां न स पापैः प्रलिप्यते ।
न ते भूयः प्रयास्यन्ति योनिमार्गं सुकण्टकम् ।। 32

क्रमान्मोक्षं गमिष्यन्ति ये नरा लिङ्गमाश्रिताः ।
काञ्चनं मेरुमात्रं च सर्वां दत्वा वसुन्धराम् ।। 33

सागरान् वस्तुपूर्णांश्च न लिङ्गार्चयितुः समम् ।
मेरुमन्दरतुल्योऽपि राशिः पापस्य कर्मणः ।। 34

ईश्वरं वैद्यमासाद्य नश्यते दुष्टरोगवत् ।
शिवार्चनरतो नित्यं महापातकसंयुतैः ।। 35

दोषैः कृतैर्न लिप्येत पद्मपत्रमिवाम्भसा ।
छित्वा छित्वा च भूतानि हत्वा सर्वमिदं जगत् ।। 36

यजेदेकं विरूपाक्षं न स पापैः प्रलिप्यते ।
सर्वावस्थां गतो वापि युक्तो वा सर्वपातकैः ।। 37

शिवमिष्ट्वा नरः सोऽपि प्रयाति परमां गतिम् ।
शिवं सर्वत्र सम्पूज्य सविशेषं सविस्तरम् ।। 38

अश्वमेधायुतं पुण्यं लभते नात्रसंशयः ।
सरित्समुद्रतीरेषु पर्वतेषु वनेषु च ।। 39

गिरिकन्दरदुर्गेषु गह्वरेषु वनेषु च ।
पुष्करिण्यां तथाऽन्यत्र तीर्थायतनसंश्रये ।। 40

यत्र वा रमते बुद्धिस्तत्रैव शिवमर्चयेत् ।
सर्वयज्ञेषु यत्पुण्यं लभते नात्र संशयः ।। 41

यः समर्चयते भक्त्या तस्य पुण्यं ततोऽधिकम् ।
अतो विनापि मन्त्रेण पुण्यराशिः प्रकीर्तितः ।। 42

स्यादयं मन्त्रसंयुक्तः पुण्यं शतगुणाधिकम् ।
तस्मान्मन्त्रेण शर्वाय स्नानगन्धफलादिकम् ।। 43

भूम्यश्वरथवस्त्रं च हेमाद्यादि निवेदयेत् ।
जप्यो नमः शिवायेति मन्त्रः सर्वार्थसाधकः ।। 44



सर्वमन्त्राधिकश्चायं ओङ्काराद्यः षडक्षरः ।
शिवो नान्तर्बहिर्यस्माद् व्याप्तं सर्वं चराचरम् ।। 45

जगदोमिति यद् ब्रूते तस्मादोमिति स स्मृतः ।
अयमर्थो हि तिसृभिर्मातृभिः परिगीयते ।। 46

ब्रह्मा हरिश्च रुद्रश्च मातृभिस्तत्प्रकीर्तिताः ।
दक्षिणाङ्गे भवेद्ब्रह्मा हरिर्वामाङ्गसम्भवः ।। 47

हृदयान्निर्गतो रुद्रो ब्रह्मविष्णुप्रबोधकः ।
जगत्सृष्टिकरो ब्रह्मा विष्णुर्लोकविमोहनः ।। 48

अनुग्रहपरो नित्यं नीलरुद्रः शिवात्मकः ।
त्रिभिरेतैर्जगद् व्याप्तं कारणैरात्ममूर्तिभिः ।। 49

शिवस्य मातरश्चैताः सर्वलोकप्रपूजिताः ।
एता एव त्रयो वेदास्त्रयो लोकास्त्रयो गुणाः ।। 50

त्रयोऽग्नयः त्रिवर्गश्च यच्चान्यज्जगति स्थितम् ।
अर्धमात्रापरो रुद्रः शिवः परमकाराणः ।। 51

तस्मादेतत्समुत्पन्नं जगतः कारणत्रयम् ।
सर्वयज्ञपरः शुद्धो नमस्कारो महामखः ।। 52

नमस्कारात्मयज्ञेन तस्मात्सम्पूजयेच्छिवम् ।
अज्ञानमशिवं त्वस्य सर्वदुःखालयं यतः ।। 53

स्वभावात्तदपायो हि तस्माद्बुदः परः शिवः ।
नमः शिवाय शान्ताय कारणत्रयहेतवे ।। 54

निवेदयामि चात्मानं मुक्त्यै च परमेश्वरम् ।
उक्त्वा नमः शिवायेति मुच्यते सर्वबन्धनात् ।। 55

यस्मात्तस्मात्सदा मन्त्रं ओंकाराद्यं मनुं स्मरेत् ।
सर्वदा सर्वकार्येषु क्षुतनिष्ठो वनादिषु ।। 56

धन्यो नमः शिवायेति गिरमुक्त्वा शिवं पदम् ।
यः सर्ववित्प्रबुद्धात्मा प्राणान्ते तु सकृत्स्मरेत् ।। 57

भक्त्यों नमः शिवायेति स गच्छेत्परमां गतिम् ।
पाठ्येनापि नमस्कारः प्रयुक्तः शूलपाणये ।। 58

संसारस्थर्णबन्धानामुच्छेदनकरो भवेत् ।
अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ।। 59

यः स्मरेत्संयतो नित्यं स बाह्याभ्यन्तरः शुचिः ।
स्मरणादेव रुद्रस्य पापसङ्घातजं परम् ।। 60

शतधा भेदमायाति गिरिर्वज्रहतो यथा ।
सर्वेषां शिवभक्तानां अशेषार्थप्रसिद्धये ।। 61

मन्त्रमाह शिवः साक्षादशेषार्थनिबन्धनम् ।
सद्बीजं सर्वविद्यानां आद्यं ब्रह्म परात्परम् ।। 62

सर्वसाधनको मन्त्रः शिवसूत्रं षडक्षरः ।
तस्मादनेन मन्त्रेण प्रकुर्वीत शिवार्चनम् ।। 63

तत्र देशे न दुर्भिक्षं न च मारी प्रवर्तते ।
नाकाले म्रियते कश्चित् पूज्यते यत्र शङ्करः ।। 64



दीक्षितः सूत्रमन्त्रज्ञो योऽर्चयेत्तु सदाशिवम् ।
स च यत्फलमाप्नोति तदेकाग्रमनाः शृणु ।। 65

**ईश्वर उवाच -**

यः पूजयेच्छशिकलाऽमलमौलि लिङ्गं
भस्माक्षधृत् प्रथितपर्वसु शर्वमेकम् ।
सर्वैश्च पातकवरैः स विमुक्त ईशे
संसारघोरविषसर्पमुखाभिलग्नः ।। 66

।। इति श्रीशिवरहस्ये एकादशाम्शे
पर्वपूजाकथनं नाम
द्विचत्वारिंशोऽध्यायः ।।

## ।। त्रिचत्वारिंशोऽध्यायः ।।

ईश्वर उवाच -

सर्ववेदेषु सत्प्रोक्तं सर्वयज्ञेषु यत्फलम् ।
तत्फलं कोटिगुणितं लभते नात्र संशयः ।। 1

यः शिवं पूजयेन्नित्यमन्त्यजोऽपि जितेन्द्रियः ।
भावेन तु समायुक्तः स गच्छेत्परमां गतिम् ।। 2

*नोपनीतसहस्रेभ्यो ब्रह्मचारी विशिष्यते ।
ब्रह्मचारिसहस्रेभ्यो वेदाध्यायी विशिष्यते ।। 3

वेदाध्यायिसहस्रेभ्यो ह्यग्निहोत्री विशिष्यते ।
अग्निहोत्रिसहस्रेभ्यो यज्ञयाजी विशिष्यते ।। 4

यज्ञयाजि सहस्रेभ्यः सर्वविद्यार्थपारगः ।
सर्वविद्यार्थवित्कोट्याः शिवभक्तो विशिष्यते ।। 5

तस्मादेव शिवं भक्त्या पूजयेच्छान्तमानसः ।
शिवभक्तो जितक्रोधः शिवभक्तिपरायणः ।। 6

मैत्रीकारुणिकोजस्त्रं प्राप्नोति सततं शिवम् ।
क्षणार्धेनापि यत्पुण्यं कुर्यान्मित्रेषु भावितः ।। 7

न तद्वर्षशतेनापि तपोयज्ञशतैरपि ।
सर्वप्राणिषु कारुण्यादीनाऽनायेषु भावयेत् ।। 8

---

* नोपनोतसहस्रेभ्यः - अनुपनीतसहस्रेभ्यः । न शब्देन सामासः न तु नञा ।



सर्वप्राणिषु मैत्रीस्यान्मुदिता पुण्यशालिषु ।
अपुण्यवत्सु चोपेक्षात्(?)सर्वेषां च वदेच्छिवम् ।। 9

इत्येवं पञ्चधा चित्तं भावयिता यजेच्छिवम् ।
सम्पूज्य पशुभर्तारं प्रहृष्टेनान्तरात्मना ।। 10

ध्यानं कुर्यादथोच्छिष्टं सर्वपापनिकृन्तनम् ।
कृताञ्जलिपुटो भूत्वा स्तोत्रमेतज्जपेन्नरः ।। 11

स्तुताय स्तुतिरूपाय स्तूयमानाय सर्वदा ।
स्तुतिहेतुनिधानाय(निदानाय)नमस्त्रिणयनाय ते ।। 12

देवाय दिव्यरूपाय नमो दिव्यतमाय ते ।
पराय परमेशाय परमार्थैकहेतवे ।। 13

परापरविमुक्ताय नमः परतराय ते ।
पूज्याय पूज्यपूज्याय सर्वपूज्यैकहेतवे ।। 14

पूज्यानामपि पूज्याय नमः पूज्यतमाय ते ।
नित्याय नित्यनित्याय सर्वनित्यैकहेतवे ।। 15

नित्यानामपि नित्याय नमो नित्यतमाय ते ।
दीप्ताय दीप्तदीप्ताय सर्वदीप्त्येकहेतवे ।। 16

दीप्तनामपि दीप्ताय नमो दीप्ततमाय ते ।
साराय साररूपाय सर्वसारैकहतवे ।। 17

साराणामपि साराय नमः सारतराय ते ।
शान्ताय शान्तरूपाय सर्वशान्त्येकहेतवे ।। 18

शुद्धानामपि शुद्धाय नमः शुद्धतमाय ते ।
कालाय काल रूपाय सर्वकालैकहेतवे ।। 19

कालानामपि कालाय नमः कालतमाय ते ।
सर्वमन्त्रशरीराय सर्वमन्त्रैकहेतवे ।। 20

मन्त्राणामपि मन्त्राय नमो मन्त्रतमाय ते ।
व्योमप्रमाणरूपाय ईशानाय नमो नमः ।। 21

व्योमप्रमाणभासाय अघोराय नमो नमः ।
व्योमप्रमाणसद्याय सद्योजाताय ते नमः ।। 22

व्योमप्रमाणविद्याय विद्येशाय नमो नमः ।
व्योमप्रमाणकालाय कालेशाय नमो नमः ।। 23

व्योमप्रमाणधर्माय धर्मेशाय नमो नमः ।
व्योमप्रमाणभोगाय भोगेशाय नमो नमः ।। 24

व्योमप्रमाममोक्षाय मोक्षेशाय नमो नमः ।
व्योमप्रमाणविश्वाय विश्वेश्वर नमोऽस्तु ते ।। 25

एकदेहद्विदेहाय बहुदेहाय ते नमः ।
देहातीतामरज्ञाय विश्वेशाय नमोऽस्तु ते ।। 26



एककालद्विकालाय बहुकालाय ते नमः ।
कालसङ्ख्या स्वरूपाय त्रिणेत्राय नमो नमः ।। 27

एकवक्त्रद्विवक्त्राय बहुवक्त्राय ते नमः ।
*वक्त्रासङ्ख्येययुक्ताय वक्त्रेशाय नमो नमः ।। 28

एकनेत्रद्विनेत्राय बहुनेत्राय ते नमः ।
नेत्रासङ्ख्येययुक्ताय त्र्यम्बकाय नमो नमः ।। 29

एककण्ठद्विकण्ठाय बहुकण्ठाय ते नमः ।
एकनासद्विनासाय बहुनासाय ते नमः ।। 30

नासाऽसङ्ख्येययुक्ताय नित्यं शर्वाय ते नमः ।
एकजिह्वद्विजिह्वाय बहुजिह्वाय ते नमः ।। 31

जिह्वाऽसङ्ख्येययुक्ताय नीलकण्ठाय ते नमः ।
एकहस्तद्विहस्ताय बहुहस्ताय ते नमः ।। 32

हस्तासङ्ख्येय युक्ताय शङ्कराय नमो नमः ।
एकशस्त्रद्विशस्त्राय बहुशस्त्राय ते नमः ।। 33

शस्त्रासङ्ख्येययुक्ताय ईशानाय नमोनमः ।
एकपादद्विपादाय बहुपादाय ते नमः ।। 34

* असङ्ख्यवक्त्रयुक्तायेत्यर्थे ।

पादासङ्ख्येययुक्ताय महादेव नमोऽस्तु ते ।
अव्यक्ताय नमसतुभ्यं शाश्वताय नमो नमः ।। 35

महेश्वर नमस्तेऽस्तु महायोगिन्नमोऽस्तु ते ।
महोत्तम नमस्तेऽस्तु महारूप नमोऽस्तु ते ।। 36

सदाशिव नमस्तेऽस्तु सदा शुद्ध नमोऽस्तु ते ।
सदोज्ज्वल नमस्तेऽस्तु महादेव नमोऽस्तु ते ।। 37

नमस्ते भगवन् शान्त नमस्ते भगवन् ध्रुव ।
नमस्ते भगवन् दीप्त नमस्ते भगवन् हर ।। 38

अजिताय नमस्तुभ्यं भस्माङ्गाय नमोऽस्तु ते ।
अनन्ताय नमस्तुभ्यं सर्वगाय नमोऽस्तु ते ।। 39

इति स्तवेन दिव्येन यः स्तौति परमेश्वरम् ।
स विधूयाशु पापानि शिवलोके महीत्यते ।। 40

भोगार्थी लभते भोगान् राज्यार्थी राज्यमाप्नुयात् ।
कन्यार्थी लभते कन्यां योगार्थी योगमाप्नुयात् ।। 41

मुच्यते व्याधितो रोगीर्दुःखी दुःखात्प्रमुच्यते ।
बन्धनान्मुच्यते बद्धो यशोऽर्थी च यशो लभेत् ।। 42

यान् यांश्चिन्तयते कामान् तांस्तान् प्राप्नोति मानवः ।
शिवस्य पदमाप्नोति नित्यं पठति यो नरः ।। 43



तस्यार्चनादपि तथा श्रवणादपि मानवः ।
अध्यायं यस्तु पठते शृणोति शिवभक्तिमान् ।। 44

सोऽपि शैवपदं लब्ध्वा प्रयाति परमां गतिम् ।। 45

इत्थं स्तुवीत भगवन्तमुपासहायं
दुःखं विहाय सततं ह्युरुगायमीशम् ।
तस्यायमीश्वरपदं प्रददाति देवि
पापौघतापमपहाय गतिं लभेत ।। 46

।। इति श्रीशिवरहस्ये एकादशांशे
शिवस्तुतिर्नाम
त्रिचत्वारिंशोऽध्यायः ।।